# B.A. 5th Semester (Honours) Examination, 2019-20

## SANSKRIT

**Course ID : 50911** **Course Code : AH/SNS/501C-11**

Course Title: Sanskrit Grammar

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** यथेच्छ*मेकः* प्रश्नः समाधेयः। 10×1=10

(a) ''*प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे* प्रथमा'' इति सूत्रे रेखाङ्कितपदस्य सविग्रहं समासं निरूपयत। यथासूत्रं प्रथमार्थ वैशद्येन प्रदर्शयत। 2+8=10

(b) कः कर्मप्रवचनीयः? कर्मप्रवचनीययुक्ते का विभक्तयो भवन्ति? कर्मप्रवचनीयानां स्वरूपं सोदाहरणं निरूपयत। 2+1+7=10

(c) कः समासः? समासस्य भेदविषये भेदानाञ्च स्वरूपविषये प्राचां भट्टोजिदीक्षितपादानाञ्च मतानि सयुक्ति उपस्थापनीयानि। 2+8=10

**2.** यथेच्छं *चतुर्णां* प्रश्नानाम् उत्तराणि लिखत। 5×4=20

(a) यथेच्छ*मेकं* सूत्रं व्याख्यात–

''विभाषा गुणेऽस्त्रियाम्।''

अथवा

''विशेषणं विशेष्येण बहुलम्।''

(b) निम्नोक्तयो*रेकं* व्याख्यात–

''अभिधानञ्च प्रायेण तिङ्कृत्तद्धितसमासैः।''

अथवा

''कृद्योगा च षष्ठी समस्यते इति वाच्यम्।''

(c) *एकस्य* व्याख्या कार्या–

''आधारोऽधिकरणम्''

अथवा

''समर्थः पदविधिः''

(d) निम्नोक्तयोरेकस्य व्याख्यानं क्रियताम्।

''सहयुक्तेऽप्रधाने''

अथवा

''संख्या वंश्येन।''

(e) रूपसिद्धिः कार्या–

'अपदिशम्'

अथवा

'अधिहरि'

(f) निम्नोक्तयोरेकस्य रूपस्य सिद्धिप्रकारः प्रदर्श्यताम्–

'घनश्यामः'

अथवा

''कुम्भकारः''

(g) अधोधृतयोरेकस्य रूपस्य सिद्धिः कार्या–

''मातापितरौ''

अथवा

''पीताम्बरः''

**3.** अधोधृतेषु *पञ्चानां* प्रश्नानाम् उत्तराणि लेख्यानि। 2×5=10

(a) 'यवेभ्यः *गां* वारयति।'– इत्यत्र रेखाङ्कितपदे केन सूत्रेण का विभक्तिः विहिता? कश्च विभक्तेः अर्थः?

(b) ''जटाभिः तापसः''– इत्यत्र रेखाङ्कितपदे केन सूत्रेण का विभक्तिः विहिता? कश्च विभक्तेः अर्थः?

(c) ''*नृसिंहाय* नमस्कुर्मः''– इत्यत्रोदाहरणे रेखाङ्कितपदे प्रयुक्ता विभक्तिः युक्ता अयुक्ता वेति सयुक्ति लिखत।

(d) कः शेषः? तस्मिन् का विभक्तिः भवति?

(e) ''*पापे* अभिनिवेशः।''– इत्यत्र रेखाङ्कितपदे केन सूत्रेण कस्मिन् अर्थे का विभक्तिः विहिता?

(f) किमुपसर्जनम्?

(g) ''चार्थे द्वन्द्वः''– इत्यत्र कः चार्थः?

(h) ''सुगन्धिः वायुः''–इत्यत्र रेखाङ्कितपदस्य कः अर्थः? कोऽत्र समासः?